दत्वा ॥ अनादिनी ध० ॥ अपसव्यं ॥ अन्नन्कर्मेति विसर्जयेत् ॥
पिंडं जलं प्रवाद्य ॥ स्नात्वाचम्य ॥ धान्यदानं कुर्यात् ॥ तत्र
मंत्रः ॥ सर्वदेव मयं धान्यं सर्वावत्य हरं महत् ॥ पाणिनां जीवनं यस्मा
मतः शांतिं प्रयच्छमे ॥१॥ धान्य ऽसि धिनोहिदेवान्प्राणा यत्वो दानायत्वा
ध्यानायत्वा ॥ दीर्घो मनुप्रसितिमा युसे धान्देवोवः सविताहिरण्य पाणिः
प्रतिगृभ्नणा त्वच्छिद्रेण पाणिना चक्षुकेत्वा महिनाम्पयोसि ॥१०५॥
अनेनधान्यदा० मद्दतस्तवो० ॥ इतिसप्तमदिनं समाप्तः ॥

अथ अष्टमदिनं कृत्य ॥ कर्ता स्नात्वा ॥ आचम्य प्राणानायम्य पवित्र
पाणिः देशकालौ संकित्य ॥ गोत्रस्य प्रेतस्य प्रेतत्व० नार्थं अष्टमेहनि
अष्टम दिन कृत्यार्थं हविरुत्पादनंच करिष्ये ॥ अथ अश्मारनानं ॥
केशवादि चतुर्विंषती २४ अंजली दानं ॥ गोत्रस्य प्रेतस्य प्रे० नार्थं
अष्टमेहनि दाहोप शमनार्थं अश्मोपरि तिल तोयां जली मद्दत्तस्त० ॥
इति पंचम दशः १५ गोत्रस्य प्रेतस्य प्रेतत्व० नार्थं अष्टमेहनी लोम
त्वचा मांस लोहित ✱ वल्कलस वायुनिष्पतयेच अंगपूरक पिंडदान महं
करिष्ये ॥ विप्रार्थे कुशभटाय स्थाप्य ॥ भुरुपलिप्य ॥ गो० प्रे० पिंडाय
आसन० ॥ अवनेजनं ॥ पिंडदानं ॥ गोत्र० प्रेत० प्रे० नार्थं अष्टमे
हनी लोमत्वचा मांस लोहित कल्कलास वायुनिष्पतयच ॥ लोमभ्यः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वाहा लोमभ्यः स्वाहा त्वचेस्वाहा त्वचेस्वाहा लोहिता यस्वाहा लोहि
ता यस्वा मेदोभ्यः स्वाहा मेदोभ्यः स्वाहा॥ मा ꣳ सेभ्यः स्वाहा मा ꣳ
सेभ्यः स्वाहा स्नावभ्यः स्वाहा स्नावभ्यः स्वाहा स्थभ्यः स्वाहा स्थभ्यः स्वा
हा मज्जाभ्यः स्वाहा मज्जभ्यः स्वाहा रेतसे स्वाहा पायवे स्वाहा॥१०६॥
यथाचिन्तावयव संभुत्यै अंग पूरक एषपिंड मयादियते तवोपतिष्ठतां॥
प्रत्यवने जन मुप०॥ पिंड पूजन पूर्ववत॥ ततः तिलतोय पात्रं॥
गो० प्रेत० नार्थं अष्टमेहनी ष्टशोप शमनार्थं तिलतोय पात्रं मदत्त०॥
सव्येन पिंडो परि हस्तं दत्वा॥ अनादिनि धनो०॥ अपसव्यं॥ अक्रूर
कर्मेति विसर्जयेत॥ अभिरभ्यतां अभिरभ्य ताम॥ पिंडं जलं प्रवा
ह्य॥ स्नात्वाचम्य॥ गुडदानं॥ तत्र मंत्रः यवद्वेयेशु वि

श्वात्मा प्रवरश्च जनार्दना:॥ समदेवस्तु वेदानां माहोदवस्तु योगिनां॥१॥
तथा रसानां प्रवर: सदेवेशु रसोतम:॥ ममस्तस्मा परां लक्ष्मीं ददस्य गुड
सर्वदा॥२॥ समुद्रꣳ छ स्वाहान्तरिक्षꣳ छ स्वाहा देव ꣳ सवितारꣳ छ
स्वाहा मित्रावरुणा ग्छ स्वाहा होरात्रे गछ स्वाहा छंद्वा ꣳसि गछ स्वाहा
द्यावा पृथिवी गछ स्वाहा यज्ञꣳ छ स्वाहा सोमꣳ छ स्वाहा दिव्य ग्ं गो
गछ स्वाहा ग्ं वैश्वानर ꣳ छ स्वाहा मनोमे हार्दि यछ दिवन्ते धूमो गछतु
स्वर्ज्यो ति: पृथिवीम्न स्मना वृणा स्वाहा १०७ अनेन गुडदानेन मद्
त्तस्तवो०॥ इति अष्टमदिनं समाप्त:॥ अथ नवम दिन कृत्यं॥
कृतस्नात्वा॥ आचम्य प्राणानायम्य पवित्र पाणि:॥ देशकालौ संकी
र्त्य॥ गो० प्रे० प्रतत्व नार्थं नवम दिन कृत्यार्थं हविस्तादनंच करि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ष्ये॥ गो० प्रे० नार्थं नवमेहनी विषमश्राध्दे पिंडदान महंकरिष्ये॥ विप्रार्थे
कुशभटा:॥ भूरुपलिप्य॥ गोत्र० प्रे० नार्थं पिंडाय आसनउ० अव
नेजनं॥ पिंड दानं॥ गो० प्रेत० नार्थं नवमेहनि विषमश्राध्दे यश्चा
पिंड मयादियते तवो० ॥प्रत्यअवनेजन उ०॥ पिंड पूजन पूर्ववत्॥ सव्येन
पिंडो परिहस्तं दत्वा॥ अनादिनि धनं॥ अपसव्यं॥ अत्रन्वकेमिति
विसर्जयत॥पिंडं जलं प्रवाह्य॥स्नायात्॥इति विषमश्राध्दं॥ अथ अ
वयव पिंडदानं॥ आचम्य प्राणानायम्य केशवादि चतुर्विंशति २४
अश्मास्नानं॥ अथ अंजुलि॥ गोत्रस्य प्रेतस्य प्रेत० नार्थं नवमेहनि
दाहोपशमनार्थं अश्मोपरि तिलतोयांजली मद्दत्त स्तवो० मिति सप्तदशां
जुलि १७ अथ पिंड संकल्प:॥ गोत्र० प्रेत० प्रेतत्व० नार्थं नवमेह

नी वीर्य संभूत्यै देवदत्त वायु निष्पतयच्च यथाचित्तावयव संभूत्यै अंगपूर
क पिंडदान महंकरिष्ये॥ विप्रार्थे कुशभटं स्थाप्य॥ भूरुपलिप्य॥
गो० प्रे० पिंडाय आसनमु०॥ अवनेजन मु०॥ पिंडदानं॥ गोत्र० प्रेत०
प्रेतत्व० नार्थं नवमेहनी वीर्य संभूत्यै देव दत्त वायुनिष्पतयच्च॥ शुक्र
ज्जोतिश्च चित्र ज्जोतिश्च सत्यज्जो तिश्च ज्जोतिष्मांश्च॥ शुक्र
श्च ऽऋतपा ऽश्चात्य ऽहा:॥१०८॥ यथाचित्तावयव संभूत्यै अंग
पूरक एषपिंड मयादियतां तवोपतिष्ठतां॥ प्रत्यवनेजन मुप०॥ पिंड
पूजन पूर्ववत्॥ तिलपात्र दानं॥ गोत्र० प्रेत० नार्थं नवमेहनी तृषो
पशमनार्थं तिलतोय पात्र मद्दत्त स्तवो०॥ सव्येन पिंडोपरि हस्तं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दत्वा॥ अनादिनि धनं०॥ अपसव्यं॥ अन्नन्कर्मेति विसर्जयत्॥

३७ पिंडं जलं प्रवाह्य॥ स्नात्वाचम्य॥ रौप्य दानं॥ तत्र मंत्रः॥ प्रीतये

तः पित्रृणांच विष्णुः शंकर योर्यथा॥ शिवनेत्रो ऽद्भवे रौप्यं मतः शांतिं

॥१॥ अनेन रौप्यदानेन०ति ष्टतां०॥ इतिनवम दिनं समाप्तं॥

अथ दशम दिन कृत्यं॥ कर्ता स्नात्वाचम्य प्राणा नायम्य

पवित्र पाणिः देशकालौ संकीर्त्य॥ गोत्रस्य प्रेतस्य प्रेतत्व०नार्थं

दशमेहनी दशमादिन कृत्यार्थं हविलत्तादनंच करिष्ये॥ अथ अश्मा

स्नानं॥ केशवादि चतुर्विंशती २४ तिलतोयांजली मद्दत्त स्तवो०॥

मिति एकान विंशती अंजुली १९ पुनराचम्य प्राणायामः॥

गो० प्रेतस्य प्रेतत्व०नार्थं दशमेहनी क्षुत्पिपासा निवृत्यर्थं धनंजय

वायु निष्पतयेंच यथाचित्तावयव संभूत्ये अंगपूरक पिंडदान महं करि

ष्ये॥ विप्रार्थे कुशभटे स्थाप्य॥ भुरुपलिप्य॥ गोत्र०प्रेत०प्रेतत्व

नार्थं पिंडाय आसनउ०॥ अवनेजनं॥ पिंडदानं॥ गोत्रस्य

प्रेतस्य प्रेतत्व०नार्थं दशमेहनी क्षुत्पिपासा निवृत्यर्थं धनंजय

वायुनिष्पतयच॥ प्रनोयछ त्वर्य्यमा प्यपूषा म्प्र बृहस्पतिः॥

प्रवागेदवि ददातुनः स्वाहा॥१०९॥ यथाचित्ता अवयव संभुत्यै

अंगपूरक यशपिंड मयादियते तवोपतिष्टतां॥ प्रत्यवने जन मु०मु०॥

पिंपूजन पूर्ववत्॥ ततः तिलतोय पात्रं॥ गो० प्रे० नार्थं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दशमहनी तृषोपशमनार्थं तिलतोयांजली मदत्तस्त०॥ सव्येनपिंडोप ३८॥
३१ रिहस्तं दत्वा॥ अनादिनिधनो०॥ अपसव्यं॥ अत्रान्वग्मेति विसर्जे
येत॥ अभिरम्यतां अभिरम्य तास्म॥पिंडं जलं प्रवाह्य॥ स्नात्वाचम्य॥
॥ लवणदानं॥ तत्रमंत्रः॥ यस्मादन्नरसःसर्वो कृष्टा लवनंविणा॥
शंभोः प्रितिकरं नित्यं मतः शांतिं प्रयच्छमे॥१॥ समुद्रायत्वा धातायस्वा
हा शरिरायत्वा धातायस्वाहा॥ अवस्यवेत्वा धातायस्वाहा सिंमदायत्वा
धातायस्वाहा॥११०॥ इतिमंत्रंपठेत॥ अवे०॥ इतिदशमदिनं॥ अथ
काकबलिश्राध्दं॥ ततःकिंचित दुरंगत्वा॥ मृदांत्रिकोणंवेदिंकृत्वा॥
ततोगोमयेनसंमृज्य॥ हीरद्रादिनालंकृत्य॥ तत्रजलकुंभ पंचकं

स्थापयेत॥ तदुपरोदनीयं पिंडाश्च॥ गोत्र०प्रेत०॥शुतिपासा निवृ
त्यर्थं शोद कुंभोयंपिंड मदत्तस्त०॥ मिति मध्यस्थं निवेदयत॥ गो०प्रे
त०प्रेतसखीभ्यः यशपिंड मयादियतां मिति पूर्वस्थं॥ गोत्र०प्रेत०वैव
स्वताय यमाय एषपिंड मयादि०तवो०मिति दक्षिणस्थं॥ गो०प्रेत०
वायसेभ्यः एषपिंड मया०तवो० मिति पश्चिमस्थं॥ गोत्र०प्रेत०प्रेता
धिपतये एषपिंड मयादियतां तवोप तिष्टतां॥ मिति उत्तरस्थं निवेदयेत्॥
पिंडोपरि तिलोदकं दत्वा॥ पादुकाछत्र पताकादि प्रेत्येकेभ्यः उपतिष्टतां॥
[illegible]यात॥ ततः पश्चिम देशस्थपिंडं यावद्वायसोतिभक्षे तावत्
तिष्टत॥ इतिकाकबलि श्राध्दः॥ ततो अस्मा तैलाभ्यंगं कृत्वा॥क

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ती सर्वेशां गोत्रजानां पाशानां पाशाणोपरि तिलांजली अभयदानं॥ प्रेरणीयं॥ ३१॥
गोत्र० प्रेतस्य प्रेतत्व नार्थं दशमेहनि एषते तिलांजली मदत्त स्तवोप ति
ष्टतां॥ इति प्रयोगेन त्रिरंजलिं दद्यात्॥ सर्वेशां तिला~~क~~मलक सर्वोष
धि स्नानं॥ पाशाणस्य तैलाभ्यंगं जले प्रक्षिप्य॥ शिरवा मुक्त:
पाशाण त्याग:॥ तता अश्मा विसर्जनं॥ तत्र मंत्र:॥ अश्मात्व
मधि जातो ८सित्वदय ज्जायतां पुन:॥ असौ स्वर्गाय लोकाय स्वाहा॥ ११॥
अश्वाचमे मृत्तिकाचमे गिरयश्चमे पर्वताश्चमे सिकताश्चमे वनस्पतयश्च
मे हिरण्यंचमे शामंचमे लोहंचमे सीसंच्चमे त्रपुचमे जज्ञेन कल्पन्ताम्॥ ११२॥
इति मंत्रं पठित्वा अश्मा विसर्जयेत॥ तत: पुत्रादिनां यथाचारं केशा
श्मश्रु वपनं नख कृतनंच कक्षौपस्थं वर्जं कर्त्तव्यं॥ तत: अनुभावितानां
~~प~~न पत्न्याश्च क्षौरं॥ तत: सर्वे तिलामलक स्नात्वा॥ तद ग्रहंगत्वा

गो सुवर्ण दधि दुर्वाग्नि जल स्पर्शणं॥ ऋचं वाचं न मध्यान्हिकवृ
गोमुत्रेण ग्रहं प्रोक्ष॥ नुतन भोड कृतेकं सर्वे गोत्रजै: सह शुचिपाणि:॥
॥ ततो शैय्या दानं॥ यमद्वारे पथे सूक्ष्मं कंटकै परिवेष्टितं॥ शैय्या॥
नं प्रदास्यामि प्रेताय उपतिष्टतां॥ १॥ अमुक गोत्राय अमुक शर्मणेब्राम्ह
णाय सवस्त्रं ऊंकार संयुतां दक्षिणासहितां तुभ्य महं संप्रदद॥ देवस्यत्वा
सवितु: प्रसवेश्विनो बाहुभ्यां पुष्णो हस्ताभ्यां॥ प्रतिगृह्यतां॥ प्रति
गृण्हामि॥ तत: एकोण विंषती पदानि दद्यात्॥ कांशपात्र नवंरम्यं
सान्नंचसघृतं तथा॥ ब्राम्हणो विष्णु रूपोसी तत्पादार्पितहेतय:॥
यमद्वारे महाघोरे प्रेतद्वार करोतुवो॥ इतिपदानि नाना गोत्रेभ्यो
ब्राम्हणेभ्य: भूयसींदद्यात्॥ इतिदशमदिन समाप्त:॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ अथैकादश दश दिन कृत्यं ॥ तत्र प्रातरुत्थाय मृभ्दांडानां त्यागः॥ गृहेलेपनाश्च सपिंडाश्च वस्त्रसहितं सूर्योदयात् प्रागेवगौ सल स्नानं कुर्युः॥ ततः पूर्ववत् पंच गव्यं पाद्य प्राशनं ॥ ततःकर्ता कृत मध्यान्हिको वृशोत्सर्गं कुर्यात्॥ तत्रायंक्रमः॥ ततो गोष्ठे देवा लये नदीतीरे गत्वा॥ तत्रहस्त मात्रं स्थंडिलं विधाय॥ तद्दिशानभाग हस्तमात्रं वेदिकुर्यात्॥ एकादशदिने आदौ पंचक त्रिपाद शांतिकं कुर्या त्॥ प्राप्ते सति आदौ कर्तव्या॥ सूतकांते यदाविप्र शांतिकं कुर्यात्प्रय लतः॥ इति शांतिकं कुर्यात्॥ द्वादशाष्ट-चतुरो वा मंडपः॥ कर्तव्यः॥ चतुर्दिक्षु तोरणानि कुर्यात्॥ जंबुः॥ औदंबर॥ अश्वस्थ॥ [illegible] पताकां कुर्यात्॥ गेरु हरिद्रा श्वेता पिता पांडुरा पत[illegible]

कृत्य चतुर्दिक्षु द्वारपालान स्थापयेत्॥ ततः कर्ताकृत मध्यान्हिकवृ षोत्सर्गः॥ स्वयमेव कार्ता स्नात्वा॥ चम्य प्राणानायम्य॥ पवित्रपाणिः॥ देशकालौ संकीर्त्य॥ कुश तिल जलान्नादाय॥ यवंगुण विशेषण॥ अमुक गोत्रस्य अमुकप्रेतस्य प्रेतत्व मुक्तये उत्तमलोक प्राप्तये वत्स तरि सहितं वृषोत्सर्गं महं करिष्ये॥ तदंग विष्णु पुजनंच करिष्ये॥

सहस्र शीर्षा पुरुषः सहस्राक्षः सहस्रपात्॥ सभूमि ꣳ सर्वतस्पृत्वा त्यतिष्ठद्दशा ङ्गुलम्॥ इति आवाह्य॥ पुरुषऽएवेति आसनं॥ एतावानस्यति पाद्यं॥ त्रिपादूर्ध्वेति अर्घ्यं॥ ततोविराडजायेति आचमनीयं॥ पयः पृथिव्यां मिति पयस्नानं॥ दधिक्राव्णोरिति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मिक्षे घृतं ॥ मधुघाता इति मधु: ॥ अपा ॐ रसेति शर्क
रा ॥ पंचनद्येति पंचामृत स्नानं ॥ पुरुष सूक्तेन अभिशेकं कुयो
त् ॥ शुध्दवालेति शुध्दोदकं ॥ तत कलशो परि विष्णुदवता स्थापनं ॥
तस्माद्यज्ञा त्सर्व हुत ऽ ऋचेति वस्त्रं ॥ तस्मादश्वा इति यज्ञोपवितं ॥
ततो गोपी चंदनं ॥ तंस्व ज्ञं इति गंधं ॥ सत्पुरुषं इत्यक्षतां ॥ या: फ
लिनिति पुष्पं ॥ केशवादि चतुर्विंशति नामभि: तुलसी पुष्पं ॥ ब्राम्ह
णोस्य मुखमा इति धूपं ॥ चंद्रमामनसो इति दीपं ॥ नाभ्या ऽ आसी
ति नैवेद्यं ॥ यत्पुरुषेण हविषा इति फलं ॥ सप्तास्यासन् इति
तांबुलं ॥ हिरण्य गर्भेति दक्षिणा ॥ यज्ञेन यज्ञेती अलंकरणं ॥
न युक्तान् पुरुषान इति मंत्र पुष्पां जली: ॥ अथध्यानं सहस्रबा

हुं कमला यताक्षं चराचराणां गुरुमब्ज हस्त ॥ दैत्यांतको वेद पति
पुराणं भजामि विष्णुं विहगार्य वाहं ॥ अथ विष्णुतर्पणं ॥ केशवा
दि चतुर्विंशती नामभि: ॥ विष्णुतर्पणं ॥ अपसव्यं ॥ यमायनम: ॥
धर्मराजाय० ॥ मृत्यवेन० ॥ अंतकाय० ॥ वैवस्वताय० ॥ कालाय०
सर्वभूतक्षयाय ॥ औदंबरायन० ॥ दध्नाय० ॥ नीलाय० ॥ परमेष्टि
ने० ॥ वृकोदराय० ॥ चित्राय० चित्रगुप्ताय० गोत्र० प्रेत० एकादशे
विष्णु पूजनेन विष्णुतर्पणेन उदाविष्य प्रति वचनं ॥ ब्राम्हणाय दद्या
त् ॥ अथ नमस्कारान् कृत्वा ॥ प्रेतोद्देशेन ऊर्ध्व दैहिक क्रियाकर्म
भवंतां ॥ ब्राम्हणानां विधे: सर्वे प्रेतस्य सद्गति रस्तु ॥ ब्राम्हणैप्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ति वचनं॥ सव्यं ॥ विष्णु प्रतिमा ब्राम्हणाय दद्यात्॥ इतिविष्णुपुजने समाप्तः॥ पूर्वोक्तितिथौ॥ गोत्र॰ प्रेतस्य एकादशेहनि वेदिका पूजनं॥ प्रेत मातृका स्थापनं॥ तदंगत्वेन वृषोत्सर्ग महं करिष्ये॥ तदंग आचार्याय ब्रम्हादि ऋत्विग्वरणं महं करिष्ये॥ आचार्यत्वं॰ त्वं॰ सदस्यत्वं॥ आचार्यत्वं यथास्वर्गे शक्रादीनां बृहस्पतिः॥ तथात्व मम यज्ञेस्मीन् आचार्यो भव सूव्रत॥ १॥ वृषोत्सर्गाख्ये कर्मणि आचार्यत्वा महं वृणे॥ वृतोस्मि इति प्रतिवचनं॥ इत्याचार्य वर्णं॥ यथा चतुर्मुखो ब्रम्हा स्वर्गे लोक पितामह॥ तथात्व ममयज्ञेस्मिन ब्रम्हाभव द्विजोतमः॥२॥ ब्रम्हाणं वृणियात्॥ इति ब्रम्हत्वं॥ सदस्यत्वं॥ सद्स्म स्यतिमन्दु

तम्प्रिय मिन्द्रस्य काम्यम्॥ सनिंमेधा मया सिष ॐ स्वाहा॥१॥ अद्यामुक गोत्रस्य मुक प्रेतस्य प्रेतत्व मुक्त्यर्थं अमुकामुक गोत्रान् अमुका मुक शर्मणः ऋत्विजान् अस्मिन्वृशोत्सर्गाख्ये कर्मणि सूक्त जपार्थेन त्वा महं वृणे वृतोस्मि॥ ध्रुवेतनदीक्षा माप्नोतिदीक्षया प्नोति दक्षिणाम्॥ दक्षिणा श्रध्दा माप्नोति श्रध्दया सत्य माप्यते॥२॥ ततः कुंडे स्थंडिले वा पंचभू संस्कारान् कुर्यात्॥ लौकिकाग्ने स्थापनं॥ तंतोयजमानः॥ वेदि पश्चिमतः उपविश्य॥ भूरसि भूमि रस्य दिति रसि विश्वधाया विश्वस्य भुवनस्य धर्त्र॰॥ पृथिवींद्र॰ ह पृथिवि मा हि ड्॰सीः३ इतिभूमिप्रार्थना॥ वेदवा घदिः समाप्यते बर्हिषा बर्हि रिन्द्रियम्॥ सूपेनसूपऽ आप्यते प्रणीतोऽ अग्नि रग्निना॥३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इति मंत्रेण वेदं संस्पृश्य ॥ चित्पतिर्मा पुनातु वाक् पति र्मा पुनातु देवो
मा सविता पुना त्वच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः ॥ तस्येते पवित्रपते
पवित्र पूतस्य जत्कामः पूनेतच्छकेयम् ॥ ५॥ इति जलैः ॥ संप्रोक्षे ॥
भूर्वो यज्ञस्य रजतश्च नेता यत्राणि युभ्दिः सचसे शिवाभिः ॥ दिविमू
र्ध्नि नन्दधिषे स्तरेषा ज्जिह्मा मग्ने चरूषे हव्य वाहम् ॥ ६॥ भूताय त्वा
नारायस्व ९ रमिवि रय षन्द ६ हन्ता न्दुर्य्या पृथिव्या मुर्वन्तरिक्षमन्वे
मि पृथिव्या स्त्वा नाभौ सादयाम्य दित्या ऽ उपस्थे ग्ने हव्य ६ रक्ष ॥ ७॥ शि
वो भूत्वा मह्यमग्ने ऽ अथो सीदसी वस्त्वम् ॥ शिवाः कृत्वा दिशः सर्वाः
स्वग्योनि मिहा स्मः सदः ॥ ८॥ वेद्या वेदिः समाप्यते बर्हिषा बर्हि
रिन्द्रियम् ॥ शूपेन सुप ऽ आप्यते प्रणितो ऽ अग्नि रग्निना ॥ ९॥

कृष्णो स्या रवे रश्वा ग्नये त्वाजुष्ट म्प्रोक्षामि वेदिरसि बर्हिषे त्वाजुष्टा म्प्रो
क्षामि बर्हि रसि स्रुग भ्या स्त्वा जुष्टं म्प्रोक्षाम्य दित्यै ध्रुवमसि ॥ १०॥ अन्त
रग्ने रुचात्व मुखायाः सदनेस्वे ॥ तस्यास्त्व ६ हरसा तपज्जातवेदः शिवो
भव ॥ ११॥ आमन्द्रे न्द्र हरि भिर्य्या हिमयो रुग मभिः मात्वोकचिन्नीयम
न्विन्न पाशि नोति धन्व वताँ इह ॥ १२॥ एवेदिन्द्रं वृषणं वज्रबाहुं व
सि ष्टासो ऽ अभ्यर्च न्त्यर्कैः ॥ सनस्तुतो वीर बध्दातु गोमद्यू यम्पात
स्वस्ति भिः सदानः ॥ १३॥ नीलग्रीवाः शिति कण्ठा दिव ६ रुद्रा उपश्रि
ताः ॥ तेरवा ॅ सहस्र योजने वधन्वा नितन्मसि ॥ १४॥ नीलग्रीवाः शि
ति कण्ठाः शर्वा ऽ अधाक्षमाचराः ॥ तेरवा ॅ सहस्र योजने वधन्वानित
न्मसि ॥ १५॥ अश्वस्तू परो गोमृगस्ते प्राजापत्याः कृष्णग्रीव ऽ आग्ने

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यो रराटे पुरस्ता त्सारस्वती मेष्टय धस्ता इन्वो राश्विना वधो रामौ बध्नोः
सौमा पौष्ण: श्यामो नाव्ना ꣳ सौर्य्ये यामौ श्वेत श्च कृष्ण श्च पार्श्वे यो स्त्वा
ष्टो लोम शस धूो स धूयो वा यव्य: श्वत: पुछ ऽ इन्द्राय स्वपस्या य्यधे
ह डे ष्णवो धामन : ॥१७॥ तत्वा यामि ब्रह्मणा वन्द मान स्तदा शास्ते
यजमानो हवि र्भि: ॥ अहेड मानो धरुणे हवो ध्युरु शꣳ समान ऽ आ
यु: प्रमोषी: ॥१८॥ इति ईशान कोणा दारभ्य स्तंभानां रोप्य ॥ ततः
ध्वजा रक्त वर्णा कार्य स्तंभोपरि ॥ यदाब ध्नन्दाक्षाय णाहिरण्य ꣳ श
तानी काय सुमनस्य माना: ॥ तन्म ऽ आव ध्यामि शत शारदाया युष्मा
ज्जरद ष्टि र्य्यथा सम् ॥१९॥ इतिमंत्रेण रोपणं ॥ गंधादिभि:संपूज्य ॥
आजीघ्र कलशं म त्र्या त्वा घि शन्ति न्धव: ॥ पुनरू ज्जीनि वर्त
स्वसान: सहस न्धुक्षो रूधारा पयस्वति पुनर्म्मा विशता द्र यि : ॥२०॥
इति कलशं ॥ इममे धरुण श्रुधी हवमध्वाच मृडय ॥ त्वामव स्यु
राचके ॥२१॥ तत्वा जामि ब्रह्मणा वन्दमान स्तदाशास्ते यज मानो
हवि र्भि: ॥ अहेडमानो धरुणे हवो ध्युरु शꣳ समान ऽ आयु: म्प्रमोषी:
॥२२॥ त्वन्नो ऽ अग्ने धरुणस्य विद्धान्देव स्य हेडो ऽ अवयासिसीष्ठा: ॥
यजिष्ठो वन्हि तम: शोशुचा नोविश्वा देषा ꣳ सि प्रमुमुग्ध्य स्मत
॥२३॥ सत्वन्ने ऽ अग्ने वमो भवोती नेदि ष्ठो ऽ अस्या ऽ उषसो व्युष्टौ ॥
अय यक्ष्वनो धरुण ꣳ रराणो धीहि मृडिक ꣳ सुहवोन ऽ एधि ॥२४॥
इति चतुर्भि मंत्रै · जलं पूरयेत् ॥ स्वाहा फली नीख्यो ऽ अफला ऽ
अपुष्पा स्वाश्च पुष्पि णी : ॥ बृहस्पति प्रसू ता स्तानो मुञ्चन्त्व ꣳ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हसः॥२५॥ इतिफलं॥ याॐषधीः पूर्वाजाता देवेभ्यस्त्रियुग
म्पुरा॥ मनैनुबभ्रुणामह६ शतन्धामानि सप्तच॥२६॥ इति सर्वौषधीः॥ परिवाजपतिः कविरग्निहव्यान्यक्रमीत्॥ दधद्रत्नानि दाशुषे॥२७॥
इतिपंच रत्नानि॥ स्योनापृथिविनो भवानृक्षरानिवेशनि॥ यच्छानः शर्मसप्रथाः॥२८॥ इतिसप्त मृत्तिका॥ काण्डात काण्डात्परोहन्ती पुरुषः
परुषस्परि॥ एवानोदूर्वे प्रतनु सहस्रेण शतेनच॥२९॥ इतिदुर्वाः॥ अश्वत्थेवो निषदनम्पर्णे वो वसतिकृता॥ गोभाजइत्किलासथ यत्सनवथपूरुम॥३०॥ इतिपंचपल्लवान्॥ गायत्र्यागोमुत्रं॥ मानस्तोकेतनय मानआयुस्विमानो गोषुमानोअश्वेषुरीरिषः॥ मानोधी

रान्नुद्रभामिनो धधीहविष्मन्तः सदमित्वा हवामहे॥३१॥इतिगोमयं॥ देवस्यत्वासवितुः प्रसवेश्विनोर्बाहुभ्यांपूष्णो हस्ताभ्याम्॥३२॥
इतिकुशोदकं॥ आप्यायस्वसमेतुते विश्वतः सोमवृष्ण्यम्॥ भवा वाजस्यसङ्गथे॥३३॥ इतिक्षीरं॥ दधिक्रावणोऽअकारिषंजिष्णो रश्वस्यवाजिनः॥ सुरभिनो मुखाकरत्प्रणऽआयूंषितारिषत्॥३४॥ इतिदधिः॥ घृतम्मिमिक्षे घृतमस्ययोनिर्घृतेश्रितो घृतवस्यधाम॥ अनुष्वधमावहमावहमादयस्वस्वाहाघृतंवृष
स्वभवक्षिहव्यम्॥३५॥ इतिघृतं॥ मधुवाताऽऋतायतेमधुक्षरन्ति सिन्धवः॥ माध्वीर्नःसन्त्वोषधीः॥३६॥ मधुनक्तमुतोषसो मधुमत्पार्थिवꣳरजः॥ मधुद्यौरस्तुनःपिता॥३७॥ मधुमा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ओ धनस्पतिर्म्म धुमा ओं अस्तुसूर्य्य:॥ माध्वीर्ग्गावो भवन्तुन:॥३८॥
इतिमधु॥ अपाꣳ रसमुद्वय सꣳ सूज्य सन्तꣳ सामाहितम्॥ अपाꣳ
रस स्य यो रसस्तं वो गृण्हाम्युतम मुपयाम गृहितो सीन्द्रायत्वा जुष्ट
ङ्गृण्हाम्येष तस्यानि रिन्द्रा यत्वा जुष्टतमम्॥ ३९॥ इति शर्करा॥ पञ्च
नद्य:सरस्वती मपि यन्ति सस्रोतस:॥ सरस्वती तु पञ्च धासोदेशे
भवत्सरित॥ ४०॥ इति पंचामृतं॥ आपो हिष्ठा मयो भुवस्तान ऊर्ज्जे
दधातन॥ महेरणाय चक्षसे॥ ४१॥ इति शुद्धोदकं॥ तिर्थेदक रत्नो
दकं संगमोदकं कुशोदकं॥ धान्य मसि धिनुहि देवान्प्राणाय त्वा
दानयत्वा॥ व्यानायत्वा॥ दीर्घा मनुप्रसितिमा युरवे धान्देवोव:
सविता हिरण्य पाणि: प्रति ग्रब्णा त्वच्छिद्रेण पाणिना चक्षुषेत्वामहि

नां पयोसि॥ ४२॥ इति धान्यं॥ व्रीहयश्चमे जवाश्चमे माषाश्चमे तिला
श्चमे मुद्गाश्चमे खल्वाश्चमे प्रियङ्गवश्चमे णवश्चमे श्यामाकाश्चमे
नीवाराश्चमेगोधुमाश्चमे मसूराश्चमे सर्व्वेन कल्पन्ताम्॥ ४३॥ व्रीह
यश्चमेति धान्यं॥ पूर्णशराव पंचक॥ पूर्णा दर्वि परापत सुपुर्णा पुनरा
पत॥ वस्नेवघी क्रीणा वहा ऽइषमूर्ज्जं शतक्रतो॥ ४४॥ इतिकलशो
परि निधाय॥ सुजातो ज्योतिषा सहशर्म्म वरुथमा सदत्स्वच:॥ ४५॥ वो
सो ऽअग्नेविश्वरुप ꣳ सव्यं यस्वचिभा वसो॥ ४५॥ इतिवस्त्रं वेष्टयत॥
शंतवो अम्ब धामानि सहस्र मुतवो रुह:॥ अधाशकृत्वो सूयमि मम्मे ऽ
अगद कृत॥ ४६॥ इतिमंत्रेण गंधादिभि रभ्यर्च॥ प्रार्थ येत॥ मंत्रस्तु॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

युयं हिरण्मया पूता महा तिर्थै दकान्विता ॥ वध्द मान समोपेता भवंतु
कुल वृध्दका ः"१॥ गंगादि सर्व तीर्थानी गुह्य क्षत्राणि सर्वश ः॥ तानिसर्वा
णि कुंभे स्मिन विशंतु ब्रह्म शासनात ॥ २॥ स्थिरोभव वीड्व ८ ङ्ग ९आ
शु ब्रे ब्रूव घाज्ज्य ८ धन ॥ पृथु ब्रे वसु षदस्त मंग्ने ः पुरीष वाहण ः॥ ८७॥
इति मंत्रेण कलशान स्थिरं कृत्य॥ तदुपरि ब्रम्हा विष्णु शिव यम
प्रेतानां पंचमूर्ती रग्न्यु तारण पूर्वकं स्थापयत ॥ हिमस्य त्वा जरायु
णाग्ने परिव्यया मसि ॥ पावको अस्मभ्य ꣳ शिवो भव ॥ ८८॥ प्रा
णदा ऽ अपानदा ऽ व्यानदा धचोदा धरिवो दा ः॥ अन्यास्ते अस्म
त्तपन्तुहेतय ः॥ पावको ऽ अस्म भ्य ६- शिवो भव ॥ ८९॥
इति रग्न्युत्तारणं कृत्वा॥ नमः शंभवायच मयो भवायच नमः
शंकरायच मयस्करायच नमः शिवायच शिवतरायच ॥ ५०॥ ततः नमः शंभ
वाच इतिमंत्रेण मध्यमस्थित कलशोपरि रुद्रं इहागछ इहतिष्ठ रुद्रं स्थाप
येत॥ इदं विष्णुर्वि चक्रमे त्रेधानिदधे पदम् ॥ समूढ मस्यपा ꣳ सुरे स्वा
हा॥ ५१॥ उत्तर कलशे विष्णुं मावाह यत ॥ स्थापयत ॥ ब्रम्ह जज्ञान प्र
थमम्पु रस्ता द्विसी मतः सुरुचो धेन ऽ आवः॥ सबु ध्न्या ऽ उपमा ऽ अ
स्य विष्ठा ः सतश्च योनि म सतश्च विव ः॥५२॥ पश्चिमे ब्रम्हाणं स्थाप
येत॥ यमायत्वा ङ्गि रस्वते पित्रृमते स्वाहा॥ स्वाहा घर्म्मा यस्वाहाघ
र्म्मः पित्रे॥ ५३॥ दक्षिणकलशे यमं स्थापयेत॥ अ ऋन्न्कर्म्म कर्म्म कृतः
सहद्यचा मयो भुवा॥ देवेभ्यः कर्म्म कृत्वा स्तम्येत सचाभुवः॥ ५४॥
ततः पूर्वकलशे प्रेत मातरा ः स्थापयेत॥ ततः आवाहनादि देवताप्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्यक्तं गंधादि भिः संपूज्य॥ प्रार्थ नां कुर्यात्॥ नमामित्वां विरुपाक्ष
नीलकंठ नमोस्तुते॥ नमः शिवाय शर्वाय सत्वायच मृडायच॥ अघो
रायनमस्तुभ्यं स्थौ सद्यो जाताय वैनमः॥अनादिनि धनोरुद्रो विश्वा
त्मा विश्व भावनः॥ नमस्तेस्तु माहोरौद्र प्रेतमोक्ष प्रदोभव॥१॥ इति
रुद्र प्रार्थना॥ अथ विष्णु प्रार्थना॥ नमस्ते पुंडरी काक्ष नमस्ते विश्व
भावनः॥ नमस्तेस्तु हृषिकेश महापुरुष पूर्वज॥ अनादिनि धनोदे
वो शंखचक्र गदा धराः ३॥ अव्ययः पुंडरि काक्ष प्रेतमोक्ष प्रदोभव॥
इतिविष्णुप्रार्थना॥ अथब्रह्म प्रार्थना॥ वेदाधाराय वेद्याय तानगम्या
यसूरये॥ कमंडलक्ष माला सृक् सुवहस्ता यतेनमः॥ कृष्णां जिनां
बर धरः पद्मासन चतुर्मुखा॥ जटाधर जग ध्दस्त प्रेतमोक्षप्र

दोभव॥ ३॥ इति ब्रह्म प्रार्थना॥ अथयम प्रार्थना॥ इशत्वी नमस्ते
स्तु दंड हस्त नमोस्तुते॥ धर्म राय महाकाय दक्षिणाधि पते नमः॥
महीशस्त नमस्तेस्तु धर्मराज नमोस्तुते॥ रक्ष क्षण माहा बाहो प्रेतमो
क्ष प्रदोभव॥४॥ इति यमप्रार्थना॥ अथ प्रेत प्रेत प्रार्थना॥ प्रेतत्वं आ
यतेरूपं कर्म कर्माणु सारणं॥ देहे रूप धरावापि तस्मै नित्यं नमोनमः॥५॥
इति प्रार्थना॥ ततः मध्य कलशे दक्षिणभागे वृषोत्सर्गांग मातृका
मा
पूजन महं करिष्ये॥ नंदिनिं आवाहयामि॥१॥ एवं सर्वत्र॥ करालिंमा·
२ रौद्रिं ३ अघोरां ४ घोरा ५ राक्षसी ५ विजयाच्च ६ जयां ७ चैव प्रे
तमातृः पपूजयत॥ इति प्रेतमातरः॥ ततः मध्यम कलशे स्य इशान
भागे वृषोत्सर्ग मातरं पूजयत्॥ अद्य पू॰ गो॰ प्रे॰ वृषोत्सर्ग मातृ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

का पूजन महं करिष्ये ॥ तासांनामानि ॥ गंदां मावाहयामि १ सुमनसां २
वसुरूपां ३ सुषीलिकां ४ सुरभिं ५ सुप्रभां ६ सौर्यां ७ वृषासंगेच मातरः॥
गंधादिभिः॥संपूज्य॥ इतिवृषोत्सर्गे मातरः ॥ अथपश्चिमे ॥पृथिवींमा
वाहयामि १ वसुधां २ धनदां ३ एक्षिण्यै ४ पक्षिण्यै ५ पशाच्च ६
धरणस्योतभ्रुन मसि धरुणस्यस्कं भसजे नि स्तो धरुणस्य ऽ ऋतस्य न्य
सि धरुणस्य ऋतसदन मसि धरुणस्य ऋत दन मासीद द ॥ ५५॥ इतिमं
त्रेण पूजयेत॥ अथदक्षिणे॥ मंडुकींमावाहयामि १ राक्षसीं २ धारायै ३
जलुकायै ४ उर्ध्व केशायै ५ कंकायै ६ स्वरुपायै ७ अघोराय ८ इतिपूज
येत॥ इति वृशोत्सर्गे मातरः॥ ततःमध्यमकलशे रुद्राध्याय जपः॥

नमस्ते रुद्रमन्यव॰॥ उत्तर कलशस्य पुरुषसूक्तं जपः॥सहस्र शीर्षा
पुरुषा ः॥पश्चिमकलशे ब्रम्हसूक्तं जपः॥ब्रम्हसूक्तं तेजोसि॥ तेजो
सि शुक्रममृतया युष्मा ऽ आयुर्मे पाहि॥ देवस्यत्वा सवितुः प्रसवे
श्विनो बाहुभ्यां मपूष्णो हस्ता भ्या माददे॥ ५६॥ दक्षिणकलशे अ
पेता जपः॥ पूर्व कलशे तेदेवा जपः॥ जपांते कुंडस्य पश्चिमे उपवि
श्य॥ आचम्य प्राणानायम्य देशकालौस्मृत्वा॥ एवंगुण विशेषण
विशष्टायां पुण्यतिथौ वृषोत्सर्गांग भूतं होम महं करिष्ये॥ इतिसंकल्पः॥
तदंग भूतं पंचभू संस्कार पूर्वकं अग्नि प्रति ष्टापन महं करिष्ये॥
तत्र स्त्रिर्भिदर्भैः ॥परिसमुह्य॥ गोमयोदकाभ्यां मुपलिप्य॥ खड्ग
कृतिना स्रुवेण वांउलिरुच्य॥ प्राक् संस्था तिस्रो रेखा ः कार्या ः॥अ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नामिकांगुष्ठाभ्यांताभ्यः पांसू ध्दरणंकर्तव्यं ॥ उदकेनाभ्युक्ष्य ।। कुंडे
वा स्थंडिले स्वाभिमुख मग्निं प्रतिष्ठाप्य ।। ॐ अग्निंन्दुतं पुरो
दधे हव्य वाह मुपब्रुवे ।। देवा ँ२ँ आसादयादिह ॥१॥ ततोग्नि मू
र्ति मनसाध्यात्वा ॥ ॐ चत्वारि शृंगा त्रयोऽ अस्य पादाद्वे शीर्षे
सप्तहस्तासोऽ अस्य ॥ त्रिधा बध्दो वृषभो रोरविति महोदेवो
मर्त्या ँ२ँ आविवेश ॥२॥ अथवैकल्पिका व धारणं ॥ पूर्वेण
ब्रम्हणोगमनं ॥ उत्तरेण पात्रा सादनं ॥ द्वेपवित्रे ॥ ताम्रमय आ
ज्यस्थालि ॥ पालाशः समिधः ॥ प्राच्यावाघारौ ॥ समिध्दतमे
आज्य भागौ ॥ पूर्णपात्रं दक्षिणा ॥ देवताभिध्यानं ॥ ब्रम्होप
वेशनं ॥ क्षीर परीप्रणयनं ॥ तंदुलानंतरं ॥ पौर्ण चेरः सि

ध्दस्यासादनं ॥ क्षीरेण पायसश्रपनं ॥ समिदाधानं ॥
एतानवैकल्पिकान्पदार्थान्न्यंह यक्ष्य ॥ अथदेवताभिध्यानं ॥
इहरतिं ॥ इहरमध्वं ॥ इहधृतिं ॥ उपसृज्यं ॥ रायस्पोरवं ॥
एताशडेदवताः ॥ अज्यन ॥ तत्र प्रजापतिं ॥ इन्द्रं ॥ अग्नीं ॥
सोमं ॥ आज्येन ॥ अग्नये ॥ रुद्राय ॥ शर्वाय ॥ पशुपतये ॥ उग्रा
य ॥ अशनाय ॥ भवाय ॥ माहादेवाय ॥ इशानाय ॥ १ ॥ यतान्
नवदेवता चरुणा ॥ अथ प्रधानदेवता ॥ रुद्राय ॥ विष्णु
वे ॥ ब्रम्हणे ॥ यमाय ॥ प्रेतपुरुषाय ॥ यता पंचदेवता चरु
णा ॥ अथ प्रेत मातरः आज्येन ॥ नीदन्ये ॥ करात्यै ॥ रौद्रेय ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अघोरायै ॥ घोर राक्षसी ॥ विज यायै ॥ जयायै ॥ अथ वृषोत्सर्ग मातरः ॥

नंदायै ॥ सुमनसा ॥ वसुरुपा ॥ सुशीला ॥ सुर रेवे लिका ॥ सुरभी ॥ सु

प्रभा ॥ सौदर्यै ॥ पृथ्वी ॥ वसुधा ॥ धनदा ॥ यक्षिणि ॥ पक्षिणि ॥

पिशाच्यौ ॥ मंडुकी ॥ राक्षसि ॥ धारा ॥ जलुका ॥ उर्ध्व केशी ॥ वंका

टी ॥ खरूपा ॥ अघोरा ॥ एता वृशोत्सर्ग मातरः ॥ आज्येन ॥

ततः पौष्ण चरु ॥ पुषा ॥ उभयोः ॥ अग्नये स्विष्ट कृतं ॥ अग्निं ॥ वायु ॥

सूर्यं ॥ अग्नि वरुणौ ॥ अग्नि वरुणौ ॥ अग्नीं वरुणं ॥ सवितारं ॥

विष्णु विश्वान्देवान् मरुतः स्वकृत् ॥ वरुणं ॥ प्रजापतिं ॥ एता

देवता ॥ आज्येन अस्मिन्वृशोत्सर्गारब्ध कर्म न्यङ्गं वेक्ष्य ॥

॥ अथ कुशकंडिका ॥ ततोग्नेर्दक्षिण उत्तर तश्च त्रिभि स्त्रीः कुशौ

रासन द्वयदानं ॥ पंचा शद्भिः कुशै निर्मितं मुत्तरासने ब्रम्हाणं व्रणी

यात् ॥ अस्मिन्वृशो त्सर्गारब्ध कर्मणि कृताकृता वेक्ष कत्वे नत्वं ब्रम्हा

भव ॥ भवामिति प्रति वचनं ॥ दक्षिणः पादः पुरः सरं ॥ दक्षिणा सनं

गछेत् ॥ तदासन मवलोक्य ॥ एवं तृणं नैर्ऋत्यां निरस्य ॥ अग्न्याभि

मुख मुपविशेत् ॥ ततः प्रणितार्थ मासन द्वयदानं ॥ वायव्या मेकं ॥

मुत्तरस्या मेकं ॥ प्रणिता पात्रं वामहस्ते गृहित्वा ॥ दक्षिणहस्तेस्थित्

घृतपात्र स्रुचितोदक पूरइत्वा ॥ प्रथमासने संस्थाप्य ॥ उदकमालभ्य ॥

ब्रम्हाणमवलोक्य ॥ द्वितीयासने निदध्यात् ॥ अग्नेरुत्तरतो द्वादशां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गुलांतराले प्रणितास्थापनं कृत्वा॥ ततो दर्भ मुष्टि मादाया ग्नि मिशानि मारभ्येशानी पर्यंतं त्रिभि स्त्रिभि दर्भै रवि छिन्नोयै: प्रदक्षिण मग्नि परि स्तीर्य॥ उत्तरत: अर्थवत्पात्राण्यासाद्य॥ पवित्र छेदना दर्भा स्त्रय:॥ पवित्रेद्वे॥ प्रोक्षणि पात्रं॥ ताम्रमय आज्यस्थालि॥ चरुस्थालि॥ सं मार्जन कुशास्त्रय:॥ उपयमनु कुशा पंच पभ्रु तय:॥ समिधा मस्ति स्र:॥ स्रुवा: आज्यं॥ तंदुलापौष्ण देवता॥ सिद्ध पिष्टमयं चरुणा॥ क्रमेण आसनं॥ इशानस्य वृषभो कल्पनं॥ तंदुलापूर्ण पात्रं॥ यता न्युपकल्प्य॥ पवित्रे कृत्वा॥ द्वयोरुपरि त्रिन्निधाय॥ द्विमुलेनद्वौ कुशौ॥ प्रदक्षिणि कृत्य॥ दक्षिणेद्वौ सव्ये कृत्वा॥ सर्वान्युगप धृत्वा॥

उद्धृतांगुलि पर्व स्यां छित्वा॥ तास्त्री नुत्तरत क्षिपेत॥ प्रोक्षणि पात्रं वामहस्ते गृहित्वा॥ दक्षिण हस्तेन प्रणितोदकेन पुरइत्वा॥ ताभि: स्तासां प्रोक्षणिनां मुत्पवनं कर्तव्यं॥ सापवित्राभि: प्रसारितो त्तान हस्तांगुलि भिस्तो नोदकेन तेषामासादित पात्राणां यथाक्रम मुदङ्मु णं कर्तव्यं॥ तय्यथा॥ अज्य स्थाल्यां प्रोक्षणं॥ चरुस्थाल्यां प्रोक्षणं॥ सम्मार्जन कुशानां प्रोक्षणं॥ उपयमनु कुशानां प्रोक्षणं॥ समिधानां प्रोक्षणं॥ स्रुवस्य प्रोक्षणं॥ आज्यस्य प्रोक्षणं॥ तंदुलानां प्रोक्षणं॥ पिष्टचरु प्रोक्षणं॥ वृषभस्य प्रोक्षणं॥ पूर्ण पात्रस्य प्रोक्षणं॥ तत: असंचरे प्रणिताग्नयोर्मध्ये षडं गुलांतराले प्रोक्षणि नां निधानं॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आज्यस्थात्यां माज्य निर्वापः॥ चरुस्थात्यां तंदुल प्रक्षेपः॥ चरुं प्रणी
तोदकेन त्रिप्रक्षाल्य॥ च्यर्वा ज्ययो र्युगप द्ब्रह्मणा यजमानेन न्वाधि
श्रपणं कर्तव्यं॥ तत्रदक्षिणे आज्यं ब्रह्मा श्रपति॥ उत्तरे चरुर्यजमानः॥
अधिश्रिते चरौ॥ ततो ज्वलदु ल्मुकेन इशानी मारभ्य उभयो श्च्यर्वा
ज्ययोः॥ पर्य्यग्नि करणं कर्तव्यं॥ ततः स्रुवस्य प्रतपनं॥ सम्मार्जन
कुशैः मुलादारभ्य अग्रपर्यंतं॥ अग्रे रग्र मारभ्य॥ मूलपर्यंतं स्रुवं समृ
ज्य॥ प्रणितोदकेना भ्युक्ष॥ पुनः प्रतप्य॥ स्वदक्षिणतो निदध्यात्॥
आज्य मुद्वास्य पूर्वेणानी याग्ने रुत्तरतो निदध्यात्॥ चरु मुद्वास्य॥
पश्चिमतः आनीय॥ आज्यस्थो त्तरतो निदध्यात्॥ तत्पवित्राभ्या

माज्य मुभयो वेक्ष॥ अपद्रव्यं निरस्य॥ प्रोक्षणी नां पुनरुत्पवनं कर्त
व्यं॥ गदाधर मेतत्तु अग्ने पश्चा दाज्यं नीत्वा॥ उत्पवनं कर्तव्यं॥ आज्य
मग्नेः पश्चा दानियं॥ चरुं चानियं॥ उपयमनु कुशान्नादाय॥ तिष्ठत्समि
धो भ्याधाय॥ सपवित्र हस्तेन सर्वेण प्रोक्षण्यु दकेनाग्नेः प्रदक्षिणं पर्युक्ष
णं कर्तव्यं॥ पवित्रे प्रणिताप्सु निधानं॥ ब्रह्मणान्वारब्धः॥ स्रुवेण
जुहुयात्॥ आज्येन शडाहुति र्जुहुयात्॥ इहरित्यादि चतुर्णा देवा ऋ
षयः यजुः अग्निर्देवता॥ वृशोत्सर्गांगिहोमे विनियोगः॥ ॐ इह
रतिस्वाहा॥ इदं मग्नये नमम्॥ ॐ इहरमध्वं स्वाहा॥ इदं मग्नये
नमम॥ २ ॐ इहधृति स्वाहा॥ इदं मग्नये नमम्॥ ३ इहश्व धृति स्वाहा॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इदं मग्नयनमम् ॥ उपसृजमितिद्वयोदेवा ऋषयः ॥ उष्णिक् छंदः ॥ अ
ग्निर्देवता ॥ होमे विनियोगः ॥ ॐ उपस्तृजं धरुणं मातृ धरुणो मातरं धय
न्स्वाहा ॥ इदंमग्नये०५ रायस्पोषमस्मा सुदी धर स्वाहा ॥ म इदमग्नये०६
ॐ प्रजापतये स्वाहा ॥ इदं प्रजापतये नमम् ॥ ॐ इंद्रायस्वाहा ॥ इदंमिन्द्रा
य०॥ ॐ अग्नयेस्वाहा ॥ इदमग्नये०॥ ॐ सोमायस्वाहा ॥ इदं सोमायनम०॥
इत्याज्याहुतिं जुहुयात् ॥ अनंतरं चरुमभि धार्य ॥ चरु होमः ॥ स्रुवेण
वदाय ॥ अन्वारब्ध आज्यं जुहुयात् ॥ ॐ अग्नयेस्वाहा ॥ इदमग्नये० ॥
यथादैवत त्यागः ॥ ॐ रुद्रायस्वाहा ॥ इदं रुद्राय० ॥ ॐ शर्वायस्वाहा ॥
इदं शर्वाय० ॥ ॐ पशुपतये स्वाहा ॥ इदं पशुपतये० ॥ ॐ उग्रायस्वाहा ॥

इदं उग्राय० ॥ ॐ अशना यस्वाहा ॥ इदं अशनाय० ॥ ॐ भवायस्वाहा ॥
इदंभवाय० ॥ ॐ महादेवायस्वाहा ॥ इदं महादेवाय० ॥ ॐ इशानायस्वाहा ॥
इदं इशानाय० ॥ अथ प्रधानहोमः ॥ आज्येन ॥ ॐ रुद्राय स्वाहा ॥ इदं
रुद्राय० ॥ ॐ विष्णवे स्वाहा ॥ इदं विष्णवे० ॥ ॐ ब्रम्हणे स्वाहा ॥ इदंब्र
म्हणे० ॥ ॐ यमाय स्वाहा ॥ इदं यमाय० ॥ ॐ प्रेतपुरुषायस्वाहा ॥ इदंप्रेत
पुरुषाय० ॥ अथप्रेतमातरः ॐ नंदिन्यैस्वाहा ॥ इदंनंदिन्यै नमम् ॥
ॐ करात्यै स्वाहा ॥ इदं करात्यै० ॥ ॐ रौद्रेय स्वाहा ॥ इदं रौद्रेये० ॥
ॐ अघोरायस्वाहा ॥ इदं मघोरायै० ॥ ॐ घोररा क्षसी स्वाहा ॥ इदं
घोरराक्षसि० ॥ ॐ विजयायै स्वाहा ॥ इदं विजयायै० ॥ ॐ जयायै

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वाहा॥इदं जयायै०॥ अथ वृषोत्सर्ग मातर :॥ ॐ नंदायै स्वाहा॥ इदं नं
दायै०॥ॐ सुमनसायै स्वाहा॥ इदं सुमनसायै०॥ ॐ वसुरूपायै स्वाहा॥
इदं वसुरूपायै०॥ ॐ सुशिलायस्वाहा॥ इदं सुसिलायै०॥ ॐ सुरिवलि
कायै स्वाहा॥इदं सुरिवलि कायै०॥ ॐ सुरभी स्वाहा॥ इदं सुरभी०॥
ॐ सुप्रायै स्वाहा॥ इदं सुप्रभायै०॥ ॐ सौंदर्यै स्वाहा॥ इदं सौंदर्यै०॥ ॐ
पृथ्विस्वाहा॥ इदं पृथ्विये०॥ ॐ वसुधायै स्वाहा॥ इदं वसुधायै०॥ॐ
धनदायै स्वाहा॥ इदं धनदायै०॥ ॐ यक्षिण्यै स्वाहा॥ इदं यक्षिण्यै०॥
ॐ पक्षिण्यै स्वाहा॥ इदं पक्षिण्यै०॥ ॐ पिशाच्यै स्वाहा॥ इदं पिशाच्यै०॥
ॐ मंडुकायै स्वाहा॥ इदं मंडुकायै०॥ ॐ राक्षसि स्वाहा॥ इदं राक्षसि०॥

ॐ धारायै स्वाहा॥ इदं धारायै०॥ ॐ जलुकायै स्वाहा॥ इदं जलुकायै०॥
ॐ उर्ध्व केसि स्वाहा॥इदं उर्ध्व केसि०॥ ॐ कंकाटि स्वाहा॥इदं ककाटि०॥ॐ स्वरूपाय स्वाहा॥ इदं स्वरूपायै०॥ ॐ अघोरायै स्वाहा॥
इदं अघोरायै०॥ॐ इति वृशोत्सर्ग मातर :॥ ततः पौष्ण चरुमीक्षे
धार्य॥ मुख पुछ विनाग्र हिचा॥ स्त्रुवेण वदाय॥ पूषा गोमित्यस्य
गौतम ऋषिः॥ गायत्री छंदः पूषोदेवता॥ वृषोत्सर्गांग होमे विनि
योगः॥ पुषा गाचे तुनः पुषा रक्षत्व सर्वशतः॥ पूषां धाज ई संरो
तुनः स्वाहा॥ इदं पूष्णे नमम्॥ पायस पौष्ण चरु उभयो स्विष्ट कृतं॥
ॐ अग्नये स्विष्ट कृतय स्वाहा इदं मग्नये स्विष्ट कृतये०॥ ततो भुरा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५६

घान बाहुति हुत्वा ॥ ॐ भूः स्वाहा इदं मग्नये ०॥ ॐ भुवः स्वाहा ॥ इदं
वायवे ०॥ ॐ स्वः स्वाहा ॥ इदं सूर्याय ०॥ ॐ त्वन्नो ग्नेति वामदेव ऋषिः॥
त्रिष्टुप छंदः॥ अग्नि वरुणौ देवता ॥ वृषोत्सर्गांग होमे विनियोगः॥
ॐ सत्वन्नो अग्ने धरुणस्य विद्वान्देवस्य हेडो अवया सिसीष्ठाः॥ जजि
ष्टो वन्हीतमा शोशुचानो विश्वा देषाई सि प्रम मुग्धि स्मत स्वाहा॥ इदं म
ग्नि वरुणाभ्यां नमम् ॥ १॥ ॐ सत्वन्नो ग्नेति वामदेव ऋषिः॥ त्रिष्टुप छं
दः॥ अग्नि वरुणौ देवता ॥ वृशोत्सर्गांग होमे विनियोग :॥ ॐ सत्वन्नो
अग्नेवमो भवोति। ने जुष्टो अस्या ऽ उषसो विष्टौ॥ अवयश्वणो वरुण ई
रानोविहि मृडिक ई सुहवोन ई एधि स्वाहा॥ इदं मग्नि वरुणाभ्यां

नमम्॥ २॥ ॐ अयाश्चाग्नेति वामदेवेति ऋषिः॥ बृहति छंदः॥
अग्निर्देवता ॥ वृशोत्सर्गांग होमे विनियोगः॥ अयाश्चाग्नेस्यनभि
स्यस्ति याश्च सत्व मित्व मया असि॥ अयानो यज्ञं वाहा शयानो
धेहि भेषज ई स्वाहा॥ इदं मग्नये अयसे नमम ॥३॥ ॐ जेतेशत
मिति वामदेव ऋषिः॥ त्रिष्टुप छंदः॥ वरुणः सविता विष्णु विश्वे
देवा मरुत स्वर्का देवता॥ वृशोत्सर्गांग विनियोगः॥ ॐ येतेशतं
वरुणं जेसहस्रं यज्ञिया: पाशा वितता महांतः॥ तेभि नो ऽ अद्य सवि
तोत विष्णु विश्वे मुञ्चन्तु मरुत ऽ स्वर्का स्वाहा॥ इदं धरुणाय सवि
त्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यश्च नमम॥४॥ ॐ उदु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तम मिति शुनुः शेप ऋषिः त्रिष्टुप छंदः॥ वरुणोदेवता॥ वृशोत्सर्गी
गहोमे विनि योगः॥ ॐ उदुत्तमं वरुण पाश मस्मदाधमम्॥ विम
मध्य गइ- शृथाय अथाचय मादित्य व्रते तवा नागसो अदितये स्याम
स्याहा इदं मग्नि वरुणाभ्यां नमम्॥५॥ अथेत्य नंतर॥ येनेदं अश्वोतरा
हुति जुहुयात॥ येनेद मभुतं भवि ष्यत् परिगृहि तम मृतेन सर्वम्॥
यन यज्ञस्तायते सत्यहोता तन्मे मनः शिवसं इ- त्यगस्तु॥१०८॥ ततः
अन येनेदं पंच चरणां संश्रवादि विमोकांतं कुर्यात्॥ अ ब्रह्मणे दक्षिणा
दानं॥ प्रणिता विमोकः॥ ततः संश्रव प्राशनं॥ पवित्राभ्यां मार्जनं॥
पवित्र प्रति पतिः॥ ब्रह्मणे पूर्ण पात्रदानं॥ ब्रह्मन् अस्य अशोत्सर्गी
ग तया विहितं इदं पूर्ण पात्रं तुभ्य महं संप्रददे॥ देवस्यत्वा०॥ प्रति

गृह्यतां प्रति गृण्हामि॥ प्रणिता विमोकः॥ आपः शिवा शिवतमा शां
ता स्यांततमा स्तास्ते कृन्वन्तु भेष जम्॥ होमशेषं समाप्य॥ ततो दिक्षु
रौद्रबलिं प्रि०॥ शर्वायनमः॥ इदं बलि०॥ पशुपतये०॥ इदं बलि०॥ उग्रा
य०॥ इदंब०॥ अशनाय०॥ इदं बलि॥ गो० प्रे० यकादशहनि वृषोत्सर्गा
ख्ये कर्मणि वृशोत्सर्गहवनं येतोद्देशेन उदापयेत्॥ ततः मंडपा द्दीह स्छि
तः॥ वृषभ पश्चिमद्वारे आनीय वेद्यु त्तरतः स्थापयेत्॥ यथाचस्मृतिः॥
अशोत्सर्जने वेलायां वृषाभावे कथंचन॥ मृष्मि पीष्टैश्च दर्भै वी वृशं कृत्वा
विमोचयेत्॥ नशक्यत अशोत्सर्गो होमंवा तत्र कारयेत्॥ १॥ ततो वत्स
तीर मध्यस्थं पंचपल्लव युक्तं कुशान गृहित्वा कल शोदकं पंच गव्यं॥ पं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चामृतं ॥ संगमोदकं ॥ कलशोदकं ॥ मिश्रित्वा दंपत्योः ॥ अभिशेकं
कुर्यात् ॥ अथस्नानमंत्रः ॥ आपोहिष्ठेति तिसृभिः ॥ आपोहिष्ठामयो
भुवस्तान ऽ उर्ज्जेदधातन ॥ महेरणाय चक्षसे ॥१॥ योवः शिवतमो रस
स्तस्य भाजयतेहनः ॥ उशतिरिवमातरः ॥२॥ तस्मा ऽ अरङ्गमामवो
यस्यक्षया यजिन्वथ ॥ आपोजनयथाचनः ॥३॥ भातारमिन्द्रंपंच ॥
भातारमिन्द्र मविता रमिन्द्र ꣳ हवेहवे सुवह ꣳ शूर मिन्द्रम् ॥ह्वया मि
शक्र मुरुहुत मिन्द्र ꣳ स्वस्तिनो मघवा धात्विन्द्रः ॥४॥ इन्द्र सुत्रा
भास्ववा शँ आवोभिः सुमृडिको भवतु विश्ववेदाः ॥ बाधतान्देषो ऽ
अभय ङ्कृणोतु सुवीर्य्यस्य पतयः स्याम ॥५॥ तस्यवयꣳ सुमतौ य
ज्ञियस्यापि भद्रे सौमनसे स्याम ॥ ससुत्रा मास्ववा शँ ऽ इन्द्रो ऽ अ

स्मे ऽ अराच्चे दृषः सनुतस्यु योतु ॥६॥ आमेन्द्रे रिन्द्र हरिभिर्य्या हि
मयु रर्वा मभि ॥ मात्वाकचिन्नियमन्विन नपाश्नशि नोति धन्वे वता शँ
इहि ॥७॥ एवेदिन्द्रं वृषणं वज्र बाहुं वसिष्टासो ऽ अभ्यर्च्चन्त्वर्कैः ॥
सनस्तुतो वीर वद्धातु गोमद्युयण्णात स्वस्तिभिः सदानः ॥८॥ इममे
वरुणेति चतुसृभिः ॥ इममे वरुण श्रुधीं हवमद्याचमृड त्वामवस्यु
राचके ॥९॥ तत्वा यामि ब्रह्मणा वन्दमान स्तदाशास्ते यजमानो हविर्भिः ॥
अहेड मानो वरुणे हवो ध्युरुश ꣳ समान ऽ आयुः प्रमो षी ॥१०॥ त्वन्नो ऽ
ऽ अग्ने वरुणस्य विद्वान्देवस्य हेडो ऽ अवया सि सीष्ठाः ॥ यजिष्ठो वन्हि
तमः शोशुचानो विश्वा द्वेषाꣳ सि प्रमु मुग्ध्यस्मत् ॥ ११॥ सत्व
न्नो ऽ अग्ने वमो भवोती नेदिष्ठो ऽ अस्या उषसो व्युष्टौ ॥ अवय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्ष्व नो धरुण ꣳ रराणो धीहि मृडीक ꣳ सुहऽ एधि॥१२॥ भगप्रणे
ता मेकं॥ भगप्रणेत र्भग सत्य राधो भगेमान्धिय मुद वाददन्न:॥
भगप्रनो जनय गोभिर श्वै र्भग प्रनृभि र्नृ वन्त: स्याम॥१३॥
इद माप: मेकं पेठत॥ इदमाप: प्रवहता वध्वज्य मलज्य यत॥
सञ्चाभि दुद्रोहा वृतं खञ्च शेपऽ अभि रुणम॥ आपोमातस्मादे
नस: पवमानश्च मुज्यतु॥१४॥ धरुणस्योत मेकं॥ धरुणस्योत म्म
भनमसि धरुणस्यस्कं भसर्ज्जनीस्तो धरुणस्य ऋत सदन्यसि धरुण
स्यऽ ऋतसदनमसि धरुणस्य ऽ ऋतसदन मासीद॥१५॥ पनंतुमेति
नवभि:॥ पनन्तुमा पितर: सोम्यास: पुनन्तुमा पितामह: पनन्तु ग्र

पिता महा: पवित्रेण शतायुरवा॥ पनन्तुमा पितामह: पनन्तु ग्रपि
ता महा: पवित्रेण शतायुरवा विश्व मायुर्व्य ऽश्नवै॥१६॥ ग्रग्न ऽ
आयु ꣳ खि पवस ऽ आसुवो र्ज्जमि खञ्चन:॥ ओरबाधस्व दुछु
नाम्॥१७॥ पनंतुमोदव जन: पुनन्तु मनसाधि:॥ पुनन्तुविश्वा भूता
नि जातवेद: पुनीहिमा॥१८॥ पवित्रेण पुनीहिमा * शुक्रेण देवदी
द्यत॥ अग्ने क्रत्वा क्रतू २ꣳ रनु॥१९॥ सत्ते पवित्र मच्छि द्यग्ने द्वित
तमन्तरा॥ ब्रम्हतेन पुना तुमा॥२०॥ पवमान: सो ऽ अद्यन: पवित्रेण
द्विचर्षणि:॥ स: पोता सपुना तुमा॥२१॥ उभाभ्या न्देव सवित: पवि
त्रेण सवेनच॥ माम्पुनीहि विश्वत:॥२२॥ वैश्व देवी पुनती दे द्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गाय॒त्र्या मि॒मा व॒ह्य॒य स्त॒न्वो॑ ऽधीत पृ॒ष्टाः॥ तया॑मदन्तः सध॒मा
दे॒र्यु॒व॒य॑ꣳ स्याम पतयो रयी॒णाम्॥२३॥ आप्या॑ यस्वेति पंच॥ आप्या
यस्व सꣳसृ॒ते चि॒श्र्व॒तः सोम॑ धृ॒ष्ण्यम॥ भवा॑ वा॒जस्य॑ सङ्गथे॥२४॥
सन्त्रे॒पया॑ꣳ सि समुषन्तु धा॒जाः सबृ॒ह्म॒य॒न्त्याभि मा॑ति षाहः॥ आप्या
य॒मानो॑ ऽअमृ॒ताय॒ सोम॑ दि॒वि श्र॒वा॑ꣳ स्युत॒मा नि॑धिष्व॥२५॥ आप्या
यस्व मदि॒न्त॒मसो॒म॒धि॒श्च॒वे॒ भिर॑ꣳ शु॒भिः॥ भवा॑नः सप्र॒थ॒ स्त॒मः स
खा॒ वृ॒धे॥२६॥ आते॑ व॒त्सो मनो॑ जम॒त्पर॑ मा॒चि॒त्स॒ धर॒त्था॑त्॥ अग्ने॑ त्वा
ङ्का॒मया॑ गि॒रा॥२७॥ तु॒ब्व॒न्ता॑ ऽअंगिर॒स्त॒म॒धि॒श्च॒वा॒ः सु॒क्षि॒त॒यः॒ पृ॒थक्॥
अग्ने॑ काम॒या॒ये॒मि॒रे॥२८॥ पंच॑नद्यः॒ मे॒कं॥ पंच॑नद्यः सरस्व॒ती मपि॑य

न्ति॒स॒स्रो॒त॒सः॥ सर॑स्वती तु॒ पं॒च्य॒ धा॒सो॒ दे॒श॒ भ॒व॒त्स॒रित्॥२९॥ शिरो
मे॒ श्री॒ रि॑ति॒ पंच॥ शिरो॑मे॒ श्री॒र्य॒शो॒ मु॒ख॒न्ति॒षि॒ः॒ केशा॑श्च॒ श्म॒श्रु॒णि॥
राजा॑मे॒ प्रा॒णे॑ ऽअमृ॒त॒ꣳ स॒म्रा॒ड्च॒क्षु॒र्वि॒रा॒ड्श्रो॒त्र॒म्॥३०॥ जि॒ह्वामे
भ॒द्रं॒ वा॒ङ्म॒हो॒ मनो॑ म॒न्यु॒ः स्वरा॒ड्घ्रा॑म॒ः मो॒दा॒ः प्र॒मो॒दा॑ ऽअङ्गु॒लि॒र॒ङ्गा
नि॒ मि॒त्र॒म्मे॒ स॒ह॒ः॥३१॥ बा॒हू॒मे॒ ब॒ला॒मि॒न्द्र॒ स॒ ꣳ ह॒स्तौ॒मे॒ क॒र्म॒ धी॒र्य॒ꣳ॑ म॥
अस्मा॑क्ष गु॒रो॒म॒म॥३२॥ पृ॒ष्टिर्मे॑ रा॒ष्ट्र॒ मु॒द॒र॒म॒ꣳ सौ॒ग्नी॒वा॒श्च॒ श्रो॒णी॥
ऊ॒रू॑ ऽअ॒र॒त्नी॒ जा॒नु॒नो॒ वि॒शो॒मे॒ङ्गा॒नि॒स॒र्व॒तः॥३३॥ नाभि॑र्मे॒ चित्तं॒ वि
ज्ञा॒न॒म्मा॒यु॒र्मे॒ प॒चीति॒र्॒ꣳ स॒त॥ आन॑न्द॒न॑न्दा॒ वा॒ण्यौ॒ मे॒भ॒ग॒ः सौ॒भा॒ग्य॒म॒स॒ः॥ ज॒ङ्घा
भ्या॒म्प॒द्भ्या॒न्ध॒र्मो॒ स्मि॒ वि॒शि॒ रा॒जा॒ प्र॒ति॒ष्ठि॒तः॥३४॥ त्वामि॒द्धि ह॑वामहे
त्वे इ॒त्॥ त्वामि॒द्धि ह॑वामहे सा॒तौ॒ वा॒ ज॒स्य॒ का॒र॒वः॥ त्वां वृ॒त्रे॒ष्वि॒न्द्र॒ स॒त्प॒ति॒म्न

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

६१॥ रस्त्वा हृष्टास्वधितः॥३५॥ यदेवा प्रीति कुष्माऽ सूक्तं॥ यदेवो दवहेऽन
न्देवास श्चकृमावयम्॥ अग्निर्म्मा तस्मोदनसो विश्वान्मुञ्चत्व ꣳ हसः
॥३६॥ यदि दिवा यदिनक्तै मेना ꣳसि चक्रमा वयम्॥ वायुर्म्मा तस्मोदनसो
विश्वान्मु ञ्चत्व ꣳ हसः॥ ३७॥ यदि जाग्र द्यदि स्वप्न ऽएना ꣳसि च
क्रमावयम्॥ सूर्य्यो मातस्मादेनसो विश्वान्मु ञ्चत्व ꣳ हसः॥ ३८॥ वि
श्व कर्म्मा ह्य जनि ष्टदेवा ऽ आदि द्ग्नि ꣳ ध्रुवो ऽ अभव द्वितीयः॥ तृति
यः पिता जनितौ षधी नाम पाङ्क्तं छन्द ऽ इ दधा त्युत्तरा॥ ३९॥ स्वस्तिन ऽ
इन्द्रो वृद्ध श्रवाः स्वस्तिन: पूषा विश्व वेदाः॥ स्वस्तिनस्ता क्ष्यो
अरिष्टनेमि: स्वस्तिनो बृहस्पति र्दधातु॥ ४०॥ गायत्रीत्रिष्टु ज्जग

त्य नुष्टुप ऽ क्त्या सह॥ बृह त्यु ष्णिहा ककु सुभी भि: शम्यन्तुत्वा॥ ४१॥
गंधद्वारां दुरा धर्षा नित्य पुष्टां करिशनीं॥ ईश्वरीं सर्व भूतानां तानिहोप
ह्वयश्रियं॥ १॥ गोमदूषुणा सत्या श्वाव द्धातम श्विना॥ घृतैरद्धा नृपा
स्यम्॥ ४१॥ दधिक्राँवणो ऽ अकारिरवं ज्जिष्णो रश्वस्य वाजिन:॥ सुर भि
नो मुखा करत्प्रण ऽ आयु ꣳषि तारिरवत्॥ ४२॥ तेजोसि शुक्र ममृतमा युष्पा ऽ
ऽ आयुर्म्मे पाहि॥ देवस्यत्वा सवितु: प्रसवेश्विनो र्बाहु भ्यां म्पुष्णो हस्ता
भ्यामा ददे॥ ४३॥ देवस्यत्वा स वितु: प्रसवेश्विनो र्बाहु भ्यां म्पुष्णो हस्ता
भ्याम॥ सरस्वत्यै वाचो यन्तु श्च न्द्रे नाग्ने: साम्राज्जेना भिषिं ञ्चामि॥
४४॥ देव स्यत्वा सवितु: प्रसवे श्विनो र्बाहु भ्या म्पूष्णो हस्ता भ्याम॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सरस्वत्यै वाचो यन्तुर्य्यन्त्रिय दधामि बृहस्पतेष्ट्वा साम्राज्ज्याय नाभिषिञ्चा
म्यसौ॥ ४५॥ देवस्यत्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्या मपूष्णो हस्ताभ्याम्॥
अश्विनोर्भैषज्यो नते जसे ब्रह्मवर्च्चसाया भिषिञ्चामि सरस्वत्यै
भैषज्य नधिपत्या इन्द्रस्येन्द्रिय बलाय
श्रियै यशसे भिषिञ्चामि॥ ४६॥ मधुव्वाता ऽ ऋतायते मधुक्षरन्ति
सिन्धवः॥ माध्वीर्न्नः सन्त्वो षधीः॥ ४७॥ मधुनक्त मुतो षसो मधु म
त्पार्थिव ꣳ रजः मधुद्यौ रस्तुनः पिता॥ ४८॥ मधुमान्नो वनस्पतिर्म्म
धु मा ँ ऽ अस्तुसूर्य्यः॥ माध्वीर्गावो भवन्तुनः॥ ४९॥ पयः पृथिव्या
म्पय ऽ ओषधिषु पयो दिव्यन्तरिक्षे पयो धाः॥ पयस्वतीः प्रदिशः

सन्तु मह्यम्॥ ५०॥ आपो ऽ अस्मान्मातरः शुन्धयन्तु घृतेन
नोघृत प्वः पुनन्तु॥ विश्व ꣳ हिरि प्रम्प्रवन्ति देवी रुदिराच्यः शु
चिरा पूत ऽ यमि॥ दीक्षातपसो स्तनूरसि तान्त्वा शिवा ꣳ शग्म्मा म्परि
दधे भद्रं वर्ण म्पुष्यन्॥ ५१॥ मही नाम्पयोसि धेनो दा ऽ असि ध
ेनो मे दहि॥ घृत्र स्यासिकनी नक्ष्यक्षु दा ऽ असि चक्षुर्म्मे दैहि
॥ ५२॥ चित्पतिर्म्मा पुनातु धा क्पतिर्म्मा पुनातु देवोमा सवितापुना
त्वच्छिद्रेण पवित्रेण सूर्य्यस्य रश्मि भिः॥ तस्यते पवित्रपते पवि
त्र पूतस्य यत्कामः पुने तच्छकेयम्॥ ५३॥ स ऽ ओ षधीः सोम रा
ज्ञी र्धे क्षीः शतविचक्षणाः॥ तासा मसिव मुत्तमा रङ्गा मायश
ꣳ हृदे॥ ५४॥ शन्नो देवी रभिष्टय ऽ आपो भवन्तुपितय॥ शंय्यो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रभिस्रवन्तुनः॥५५॥ शन्नोदेविति पुण्य मंत्रैः रभि षिंचयत॥

॥इति स्नान विधिः॥ ततो वृषभस्य वाम कटि भागे॥ इमारुद्रायत

वेस कपर्दि नेक्षयद्वीराय प्रभरा मेहमतीः॥ यथा शम सद्विपेद चतुष्प

दे विश्वम्पुष्टं ग्रामे अस्मिन्ननातुरम॥ ५६॥ इति कुंकुमेन चक्र

चिन्हं कृत्वा॥ यातेरुद्रशिवा तनूः शिवा विश्वाहाभेषजी॥ शिवा

रुतस्य भरवजी॥ शिवारुतस्यभेरवजि तयानो मृडजि वंसे॥ ५७॥

इतिदक्षिणबाहु त्रिशुलं विद ध्यात॥ वृषभमं वंयेति ४ लोह कारं प्र

तिवेदत॥ ततो लोहकारस्तु लोहं अग्नि तप्तं कृत्वा॥ सूत्र मंतानां का

रयेत॥ ततो वृषभेदेह रुद्रै कादश न्यासं कूर्यात॥ तत्रायं क्रमः॥

अघोराय नमः॥ इति दक्षिण पोद॥ पशुपतेयनमः॥ इति वाम

पोदे॥ शर्वायनमः॥ इति दक्षिण जानु॥ विरूपाक्षायनमः॥इति

वामकट्यां॥ कपर्दिनेनमः॥ इतिदक्षिण कर्ण॥ भैरवाय नमः॥इति

वामकर्ण॥ शूलपाणिनेनमः॥ इति दक्षि णांशे॥ इशानायनमः॥

इति वामांशे॥ महेशायनमः॥ इति मूर्ध्नी॥ एवं न्यास विधाय॥

अश रुद्र जपं च्यात्वा॥ नमस्ते रुद्रमन्यवः॥ वत्सतरिणां नामानि

कुर्यात॥ तत्रायं क्रमः॥ पार्वत्यै नमः॥कालिं दि नमः॥ कोरव्यै नमः॥

द्वे कर्णे अतेनैव क्रमेण पूजयेत॥ अथ वत्सतरि न्यासः॥ भगवत्यै

नमः॥दक्षिणपोद॥ उमायै नमः॥ वामपोद॥ शंकरप्रियायैनमः॥दक्षि

ण जानुनि॥ पार्वत्यै नमः॥ वामजानुनि॥ गौर्यैनिमः॥ दक्षिण कट्यां॥

कात्यैनमः॥ वाम कट्यां॥ शंकर प्रियायैनमः॥ दक्षिणनेत्रे॥ का

लिद्यैनमः॥ वामनेत्रे॥ कोट्यैनमः॥ दक्षिण कर्णे॥ विश्व धारि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ष्यैनमः ॥ वामकर्णे ॥ गंगोयेनमः ॥ दक्षि णांसे ॥ उपमायेनमः ॥ वामांसे ॥ शीवशक्त्यैनमः ॥ मूर्ध्नि ॥ इति वत्सतरिणां न्यासं प्रत्ये कंनिधाय ॥ अथ मंत्रोक्त न्यासं कुर्यात् ॥ अथ वृशभं न्यासः ॥ इषेत्वो ज्जो त्वा वायव स्थ देवो वः सविताप्रा र्पयतु श्रेष्ठ तमा य कर्म्मण आप्यायद्ध्व मघ्ना इन्द्राय भागम्प्रजा वती नरमीवा अयक्ष्मा मावस्तेन ईषतमा घशं सो ध्रुवा अस्मिन्गो पतौस्या त वह्वीर्य जमानस्य पशून्पाहि ॥५८॥ इति मर्घ्रि ॥ गोमदुपुणा सत्या श्वा वद्वा त मश्विना ॥ धतरुद्रा मृपास्थम् ॥५९॥ इति ललाटे ॥ घि भ्रात बृहत तिबतु सोम्य म ध्वा युद्ध यज्ञ पता वविकृतम् ॥ वात जूतो यो अभिरक्ष तित्मना प्रजाः

पुपोरव पुरुधा वि रा जति ॥ ६०॥ इति नेत्रे ॥ प्राणदा अपानदा व्यानदा वच्चेदा वरिवोदाः ॥ अन्याँस्ते अस्मत्त पन्तुह तयः पावको अस्मभ्य शं शिवोभव ॥ ६१॥ इति नाशिके ॥ अङ्गि रसोवः पितरो नवग्वा अर्थवाणो भृगवः सोम्यासः ॥ तेषां वयं सुमतौ यज्ञिया नामपि भद्रे सौमनसे स्याम ॥ ६२॥ इति शृंगा भ्यां ॥ हृदेत्वा मनसेत्वा दिवेत्वा सूर्य्या यत्वा ॥ ऊर्ध्व मिम मद्धुरन्दिवे देवेषु होत्रा सछ ॥ ६३॥ इति हृदये ॥ धातो वा मनोवा गन्धर्वाः सप्तविꣳ शतिस्ते अग्नेश्च मयुज्जस्ते अस्मिन्जवमा वस्तु दधुः ॥ ६४॥ इति बाहु भ्यां ॥ समुद्रा यत्वा धाता यस्वाहा शरीरायत्वा धाता यस्वाहा ॥ अव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्यवेत्वा धातायस्वाहा शिमिदा यत्वा धाता यस्वाहा ॥ ६५ ॥ इति कुक्षौ ॥
तमिशान ज्जगतस्त स्थुष स्पति न्धिय ज्जिन्व मवसे हूमहे वय
म ॥ पूषानोयथा वेदसाम सद्वृधे रक्षिता पायु रद ब्धः स्वस्तये ॥ ६६ ॥
इति पृष्ठ ॥ प्रजापते नत्वदेता न्यन्यो विश्वा रूपाणि परिता बभूव ॥
यत्कामास्ते जुहुमस्तन्नो ऽ अस्तु वयꣳ स्याम पतयो रयीणाम् ॥ ६७ ॥
॥ इति लिंगे ॥ वृषाग्निं वृषणम्भर न पाङ्गं भ्रे ६ं समुद्रियम् ॥ अग्न ऽ
आयाहि वीतये ॥ ६८ ॥ इति वृषणयोः ॥ क्षत्रस्यसोनि रसि क्षत्रस्य
नाभि रसि ॥ मात्वाहि ꣳ सीन्मामाहि ꣳ सी ॥ ६९ ॥ इति क्षुरं ॥
प्राणम्मे पा हय पानम्मे पाहि व्यानम्मे पाहि चक्षुर्म ऽ उर्व्या विभा
हि श्रोत्रम्मे श्लोकाय ॥ अपः षिन्वौ षधी र्जिन्व द्विपाद व चतु
ष्पा त्पाहि दिवो वृष्टि मेरय ॥ ७० ॥ इति अपाने ॥ नमो वात्यायच
रे व्याय च नमो वास्तव्या ऽ य च वास्तुपायच नमः ॥ सोमायच रुद्रा
य च नमस्ताम्रा यचा रुणायचनमः शङ्गवे ॥ ७१ ॥ इति पार्श्व योः ॥
लाङ्गलम्प वीर वत्सु सेव ऽ सोमपित्सरु ॥ तदुद्वपति गामिव म्प फर्व्य ं
ष्यषी वरी म्प स्था व द्रथ वाहणम् ॥ ७२ ॥ इति पुंछे ॥ इति वृषभंन्या
सः ॥ अथ गौन्यासः ॥ आयं गौः पृश्नि रक्र मीदसदन्मातरम्पुरः ॥
पितर ञ्च म्प यन्त स्वः ॥ ७३ ॥ इति मुर्ध्नि ॥ सप्त ऋषयः प्रति
हिताः शरीरे सत्प रक्षन्ति सद म प्रमादम् ॥ सत्पाप ः स्वपतो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लोक्मी युस्त्र जा गृतो ऽ अस्वं प्रजौ स त्र सदौ च देवौ ॥ ७४ ॥ इति
शिरसि ॥ अङ्गि : सोन: पितरो नवग्वा ऽ अर्थ धिणो भृगव:
सोम्यास : ॥ तेषां वय ऽ सुमतौ सज्ञिया नामपि भेद्र सौमनसे स्याम ॥
॥ ७५ ॥ इति भृगाभ्यां ॥ चन्द्रमा मनसो जात श्चक्ष्यो : सूर्य्यो ऽ अ
जायत ॥ श्रोत्रा द्वायुश्च ऽ प्राणश्च मुखा दग्नि रजायत ॥ ७६ ॥
इति नेत्रयो : ॥ मानस्तो केतनये मान ऽ आयुषि मानो गोरघुमानो ऽ
अश्वे खुरि रिख : ॥ मानो धीरान्नुद्रभामिनो वधीर्हविष्मन्त :
सदमित्वाहवामहे ॥ ७७ ॥ इति नासिके ॥ ब्राम्हणोस्य मुखमा सि ॥
हु राजन्य : कृत : ॥ उरुतदस्य यद्वैश्य : पद्भ्या ꣳ शूद्रो ऽ अजा

यत ॥ ७८ ॥ इति मुखे ॥ कयानश्चित्र ऽ आभुवदूती सदा वृध : सखा ॥
कयाशचि ष्ठया धृता ॥ ७९ ॥ इति कर्णयो : ॥ गोमधु पुणा सत्या श्च वा
वध्वा तमश्विना धत रुद्र नृपा सम ॥ ८० ॥ इति ललाटे ॥ गणाना
न्त्वा गणपति ꣳ हवामहे प्रियाणान्त्वा प्रियपति ꣳ हवामहे निधि
नान्त्वा निधि पति ꣳ हवामहे वसोमम ॥ आहम जानि गर्ब्भ धमा
त्वम। जासि गर्ब्भ धम ॥ ८१ ॥ इति पृष्ठे ॥ यस्ते स्तन : शशयो मयो
भूर्य्यो रत्न धा वसु वि द्व : सुद त्रा : ॥ सनधि श्चा पुष्यसि धा
स्या णि सरस्वति तमिहधात वेक : ॥ उर्वन्तरिक्ष मन्वेमि ॥ ८२ ॥
इति स्तनयो : ॥ इममे वरु श्रुधि हवमद्याच मृडय ॥ त्वामवस्युरा
चके ॥ ८३ ॥ इति योनौ : ॥ नमोस्तु सर्प्पे भ्यो येके च पृथिवी मनु ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सेऽअन्तरिक्षे यदिविते भ्यः सर्पि भ्योनमः॥८४॥ इतिपृष्टे॥ लाङ्गु लम्म वीर वत्सु सेवद्द सोमपित्सरु॥ तदु द्वपतिगाम विम्र फ ड्यऽ ऽच पीर वीम्र स्था वद्द थवाहणम्॥८५॥ इति लाङ्गु लम्॥ इति गोः न्यासः॥ अथ पूजां करिष्ये॥ सहस्र शीरेषा पुरुषः सहस्राक्षः सहस्रपात सभूमिद्द सर्व तस्पृत्वा त्यतिष्ठ दशां ङ्गु ल म्॥८६॥ इति मुगुटं॥ यदा बध्न न्दा क्षाय णा हिरण्य द्द शांतानी काय सुमनस्य मानाः॥ तन्म ऽ आव ध्वा मिशत शारदाया यु ष्म ञ्चरद ष्टि र्य्य था सम्॥८७॥ इति कर्णं॥ श्रीय श्चते लक्ष्मीश्च प त्ना वहो रात्रे पार्श्वे नक्षत्राणि रूप मश्वि नौ व्यात म्॥ इष्णन्निषा

नामु म्म ऽइषाण सर्व लोकम्म ऽइषाण॥८८॥ इति पुष्पमाला॥ पूर्णा दर्वि परापत सुपूर्णा पुनरापत॥ वस्ने वन्वी क्रीणावहा ऽइष मूर्ज्जं शतक्रतो॥८९॥ इति प्रार्थना॥ सथे मां धाच ङ्गु ल्याणि माव दानि जने भ्यः॥ ब्रह्म राजन्या ऽभ्या शूद्राय चार्य्याय च स्वाय चारणाय च॥ प्रियो देवानान्दक्षिणा यै दातु रिह भूयासमयम्मे कामः समृध्य ता मुप मादो न मनु॥९०॥ इति पुण्याह वाचनम्॥ स्योना पृथिविनो भवानृक्ष रानिवेशनी॥ यच्छा नः शर्म्म सप्रथाः॥९१॥ इति सुवर्ण शृंगी॥ मन स्त ऽआप्या यतां वाक्क ऽआप्यायताम्प्राणस्त ऽआप्य यताञ्च क्षुस्त ऽआप्याय ता ङ्गु श्रोत्र न्त आप्या यताम्॥ यत्ते क्रूरं यदास्थि तन्त ऽआ प्या यता त्रिष्टयायता न्ते शुध्धतु शमहो भ्यः॥ ॐ तत्सथे भेयस्व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वधिते मैन ꣳ हि ꣳ सीः ॥९२॥ इति घंटा ॥ सदश्वाय वास ऽ उ
प स्तृणन्त्यधी वासजाहि रण्या न्यस्मे ॥ सन्दानमर्व न्तम्प ड्डी शꣳ
प्रि या देवे ष्वाया मयंस्मि न्ति ॥९३॥ इति वस्त्रं ॥ मनो जूति र्ज्जु
षता माज्ज्यस्य बृहस्पति र्य्ज्ञ मिमन्त न त्वरि ष्ट य्यज्ञ ꣳ समि
मन्द धातु ॥ विश्वे देवास ऽ इहमा दयन्ता मो ॐ म्प्रतिष्ठ ॥९४॥
इति प्रतिष्ठा ॥ वृषभ वत्स तरिणां ललाटे कुंकु मेणा र्द्धे चंद्रा कारं
तिलकान्कुर्यात् ॥ तस्यापरि गंध अक्षतैरलंकृत्य ॥ वत्सतरिणां
सीरसो सिंदुरं चोपलिप्य ॥ अत्र गंधादि दक्षिणांत पूजयेत् ॥
एतानि अत्र गंध ॥ गोवृषभौ प्रियतां नमम ॥ वृशभस्यद

क्षिण कर्णे जप ः ॥ रुद्र सूक्तं ॥ नमस्ते रुद्र मन्यव ऽ उतोत ऽ इष
वे नम ः बाहुभ्या मुतते नमः ॥९५॥ इति रुद्र सुक्तं ॥ अथ पुरुष सू
क्तं ॥ इदं विष्णुर्वि चक्रमे त्रे धा निदधे पदम् ॥ समूढस्य पा ꣳ
सुरे स्वाहा ॥९६॥ इति पुरुषसूक्तः ॥ अथ कुष्मांड सूक्तं ॥ चत्वा
रि शृंगा त्रयो अस्य पादा द्वे शीर्षे सप्तहस्तासो ऽ अस्य ॥ त्रिधा
बद्धो वृषभो रोरवीति महोदेवो मर्त्या ँ ऽ आविवेश ॥९७॥ पिता
नो सि पितानो बोधि नमस्ते ऽ अस्तुमामा हि ꣳ सीः ॥ त्वष्टर्मन्त
स्त्वा सपेम पुत्रान्न्प्रपि धेहि प्रजा मस्म्या सुधे ह्यरिष्टा ह ꣳस
हपत्या भूयासम् ॥९८॥ धसोः पवित्र मसि शतधारं धसोः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

 पवित्र मसि सहस्रधारं ॥ देवस्यत्वा सविता पुनातु वसोः पवित्रेण शत
धारेण सुप्वा कामधुक्षः ॥९॥ सपवि त्रा प्रसवित्रा सरस्वत्या वा
च्या त्वष्ट्रा रूपैः पूष्णा पशुभिरि न्द्रे नास्मे बृहस्पतिना ब्राह्मणा
वरुणो णौ जसा ग्निनाते जसा सोमण राज्ञा विष्णुना दशम्यादे
वतया प्रसूतः प्रसर्प्पा मि॥ १०॥ इतिवृषभस्य कर्णेजपः॥ ततो
वृषभं प्रार्थ येत्॥ नंदिनि कुल संभूतो वृषत्व रुद्र वाहणः॥
गवां कोटि सहस्राणां तासत्वं वृषभ स्तथा॥ पितृमाता महा न्मा
तृ माता माह्यं स्तथैवच॥ रौरवे नरके चैव तेशां रक्ष गवांपते॥
धर्म स्त्वं वृषरूपेण जगदा नंद कारकः॥ अष्टमूर्ते रधि ष्ठान
मतः पाहि सना तनः॥३॥ इति वृषभं संप्रार्थ्य॥ ययय भग
वान् महावृषइत्यू चे वंदित्॥ ततः कृत्वा वत्सतरिणां समी पंगत्वा॥
प्रार्थ नां पेटत्॥ वत्सतरी रूपवत्यः पति वो बलिनं शुभं॥ दास्यामि
